॥ श्रीरामः शरणम् ॥

प्रतिगुरुवासरं
प्रकाश्यते

आदिशिला

सम्पादकः
डा. कृष्णप्रसादः जि.

साप्ताहिकी आदिशिलापत्रिका



द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

प्रथमखण्डस्य | श्री विश्वावसु संवत्सर माघ फाल्गुन २०२६ | प्रथमसङ्ख्या

बालवाटिका-८

ईसप्नीतिकथाः (१)

रत्नकुक्कुटयोः कथा

अनुवादकः - नारायण बाळकृष्ण गोडबोले





द्वित्राभिस्तरुणकुक्कुटीभिः सहावकरनिकरं विकिरतस्तल्लब्धापूर्ववस्तुभिस्ता रञ्जयतः कस्यापि तरुणकुक्कुटस्य दृष्टिपथं सहसा किमपि रत्नमाजगाम । तद्दीप्त्या 'इदं रत्नम्' इति स जज्ञौ, परं 'कस्तस्योपयोगः' इति न बुबोध । ततः स्वमौढ्यं निह्नुवानस्तद्भर्त्सयितुमुपचक्रमे । स पक्षौ विसार्य शिरोऽवधूय वक्रवक्रस्तन्निजगाद - "रे! त्वं मनोहार्यसि, परं कस्तवोपयोगः । अहं त्वेवं मन्ये यद्भूतलगतानि निखिलान्यपि रत्नान्येकस्य यावनालकणस्य षोडशीमपि कलां न स्पृशन्ति" ।

तात्पर्यम् = पुरुषस्य विद्यालाभः साध्वसाधुनीत्यनीतिपरिच्छेदश्चोपयोगज्ञानाभावे ताम्रचूडस्य रत्नमिव निष्प्रयोजनः । एवंविधा विद्यासत्त्वेऽपि मूर्खा आत्मनो मौर्ख्यं छादयितुकामा विद्यादीनुपहस्य स्वं मतं प्रतिपादयन्ति । एवं च भाषन्ते - "किंप्रयोजना विद्यादिगुणाः? सद्यःफला गुणा एव गुणाः" इति । एवं वदन्तो विद्वांसोऽपि हीनवृत्तयो भवन्ति ।

कुक्कुटो रत्नं च

अनुवादकः - के. एल्. व्यासराजशास्त्री

एकदा कुक्कुटः कश्चित् पादेनावकरं किरन् ।
ददर्श भासुरं किञ्चिद्रत्नं श्रेष्ठिगृहाङ्गणे ॥ १ ॥

कुक्कुटस्यानभिज्ञस्य रत्नलाभेन किं फलम् ।
रत्नमूल्यं कियद्वेति किं स जानाति मन्दधीः ॥ २ ॥

अतः स पक्षौ विस्तृत्य विधूय वदनं मुहुः ।
तारं रटन् वक्रवक्त्रस्तद्रत्नं समगर्हयत् ॥ ३ ॥

रे रत्न! शिरसा धृत्वा लोकस्त्वामभिनन्दतु ।
किन्तु धान्यकणेन त्वं नैव सादृश्यमर्हसि ॥ ४ ॥

इत्युक्त्वा स च तद्रत्नं पादेनाक्षिप्य दूरतः ।
अन्यत्र गतवान् शीघ्रं धान्यान्वेषणतत्परः ॥ ५ ॥

